रूपेणान्वयविवक्षया यस्य कर्मसंज्ञा तेन रूपेणान्वय-
विवक्षाभावः। तत्र क्वचित् कर्मणोऽविवक्षया यथा
पच्यते इत्यादौ, क्वचिच्च कर्मत्वाविवक्षया यथा मातुः
स्मर्यते इत्यादौ। अत्र मातुः कर्मत्वेनैव स्मरणान्वये
कर्मसंज्ञा न पुनः सम्बन्धत्वेन, तथा विवक्षायामेव कर्मणि
षष्ठीविधानात् स्मरणादेः कर्मान्वयसत्त्वेऽपि कर्मत्वेन
तदन्वयाभावादकर्मकत्वं तेन भावे लकारादय इति
बोध्यम्। क्वचित्तु कार्यप्रवृत्तिवेलायामविवक्षा पश्चाद्वि-
वक्षा। यथा कृतपूर्वी कटम् भुक्तपूर्वी ओदनमित्यादौ।
तथाहि कृतं पूर्वमनेनेति विग्रहे तत्कृतमनेनेति
पूर्वसूत्रादिनिमनुवर्त्त्य सपूर्वाच्चेति सूत्रेण विद्यमान
पूर्वात् पूर्वशब्दादपि इनिर्विहितः तत्र यदि कृतमिति
कर्मणि क्तः स्यात्तदा तस्य कटादिरूपकर्मविशेषणतया
सापेक्षत्वेन समासादिवृत्तिर्न स्यात् एकत्र विशेषणत्वे-
नोपस्थितस्यान्यत्र विशेषणतयान्वयायोगात् वृत्तिश्चात्र
जायते भाष्यादिषु तथाप्रयोगात्ततोऽवश्यं प्रथमं कर्मा-
विवक्षयाऽकर्मकत्वेन भावे क्तप्रत्यये विहिते तदन्तेन
पूर्वादिभिः सुप्सुपेति समासे च कृते तत्पूर्वकात् पूर्व-
शब्दात् कर्त्तरि इनिप्रत्ययो भवति। पश्चाच्च कर्तृकृत-
क्रियायाः कर्मविशेषाकाङ्क्षायां कटादिकर्मणोऽन्वयः।
उक्तञ्च हरिणा "अकर्मत्वे सत्येव क्तान्ते भावाभि-
धायिनि। पश्चात् क्रियावता कर्त्रा योगो भवति कर्म-
णाम्। अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः।
क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थितेति"। क्रिया-
वतेत्यनेन क्रियाद्वारैव कर्मणोऽन्वय इति द्योतितम् क्रिया-
याश्च वृत्तिशब्दैकदेशतयाऽनन्वयशङ्कायामाहाविग्रहेति।
नास्ति विशेषेण ग्रहो ज्ञानं यस्याः सा पृथगुपस्थित्य-
भावेन ज्ञातुमशक्येत्यर्थः गतादिस्था कर्तृबोधकनिष्ठा-
न्तगतपदोपस्थाप्यगमनकर्तृरूपार्थप्रविष्टापि यथा ग्रामं
गत इत्यादौ विभिन्नपदोपात्तैरपि ग्रामादिकर्मभिः
क्रिया सम्बध्यते तथेत्यर्थः समुदायशक्तिस्वीकारे एक
देशान्वयाभ्युपगमादवयवशक्तिस्वीकारे तु तदनुपगमे
त्वत्यभावादिति भावः। कृतपूर्व्यादिष्वित्यादिपदेनाध्वरे-
ष्विष्टीत्यादयो गृह्यन्ते तत्रापि इष्टादिभ्यश्चेत्यनेन कर्त्तरि
इनिविधानात्। अत्रेदं बोध्यं "निष्पत्तिमात्रे कर्तृत्वं
सर्वत्रैवास्ति कारके" इत्युक्तेः कर्मणोऽपि स्वव्यापार-
द्वारा क्रियानिष्पत्तिहेतुत्वेन कर्तृत्वे स्थिते तद्व्यापारस्य
धात्वर्थत्वविवक्षायां धात्वर्थक्रियाश्रयत्वेन तस्य कर्तृत्वं
समानानुपूर्वीकमुख्यार्थबोधकधातूपात्तफलाश्रयत्वेन च
कर्मत्वमित्येकस्यैव कर्मकर्तृता एवञ्च तत्र धातोरर्था-
न्तरे वृत्तेरेवाकर्मकत्वम्। तथाहि अन्नं पच्यते स्वयमेवे-
त्यादौ विक्लित्तिस्तदनुकूलो ऽन्नस्थाल्यादिसंयोगरूपो
व्यापारश्च तद्विशिष्टो वा पच्यर्थः तयोः फलव्यापारयो-
रेकनिष्ठतया तद्बोधकधातोरकर्मकत्वं तेन अन्नेन पच्यते
स्वयमेवेत्यादौ भावे लकारोपपत्तिः। द्विकर्मकाणान्तु
एककर्मणः कर्तृत्वविवक्षया ऽपरस्याविवक्षयैवाकर्मकत्वं
पचिदुह्योस्तु कर्मान्तरसत्त्वेऽपि कर्मवद्भावविधानात् सकर्म-
कत्वं तेन तयोर्न भावे लकारादयः किन्तु कर्मण्येव
तेन दुह्यते गवा दुग्धं स्वयमेवेत्यादि। एवञ्च सर्वेषामेव
धातूनां कर्मणः कर्तृत्वविवक्षायां कर्मवद्भावे प्राप्ते
धातुविशेषयोग एव कर्मवत्कार्यातिदेशो न सर्व-
धातुयोगे तेन गम्यादियोगे कर्त्तरि वाच्ये न कर्म-
वद्भावः किन्तु कर्तृवत्कार्यं, भावे तु इष्यते एव कर्म-
वत्कार्यम्। पच्यादियोगे तु कर्त्तरि भावे च वाच्ये कर्म-
वद्भाव इति विवेकः। उक्तञ्च "कर्मस्थेऽपि च धात्वर्थे
कर्मकर्त्ता च कर्मवत्। कर्तृस्थेऽपि च धात्वर्थे कर्म
कर्त्ता च कर्तृवदिति"। कर्मवत् कर्मवत्कार्यवानित्यर्थः
अतएव "कर्मवत् कर्मणा तुल्यक्रियः" इति सूत्रे कर्म-
पदेन कर्मस्थक्रिया लक्षिता शास्त्रकारैस्तेन कर्मस्थ-
क्रियातुल्यक्रियावति कर्त्तरि कर्मवत् कार्यमित्यर्थः
क्रिययोस्तुल्यत्वञ्च एकाधिकरणमात्रवृत्तित्वेन तथाच
कर्मस्थक्रियया फलेन व्यापारस्य सामानाधिकरण्ये
एव कर्मवद्भावविधानात् पच्यादेस्तथाभूतार्थकतया तत्-
कर्त्तरि कर्मवत्कार्यं, गम्यादेस्तु व्यापारस्योक्तफलसामा-
नाधिकरण्याभावात् कर्तृस्वभावकत्वमिति विवेकः।
तथा तुल्यक्रिये कर्त्तरीत्यभिधानेन गम्यादीनामपि भावे
कर्मवत्कार्यं यागादि भवत्येव। यद्यपि सर्वेषामेवाकर्म-
काणां फलव्यापारयोः सामानाधिकरण्यबोधकतया
कर्मवद्भावापत्तिस्तथापि सूत्रे कर्मणा तुल्येति निर्देशात्
येषां धातूनां मुख्यार्थवाचिनां सकर्मकत्वं तेषामेव
कर्मवद्भाव इति गम्यते अस्त्यादेः सत्तादिरूपमुख्यार्थे
सकर्मकत्वाभावात् न तत्प्रसङ्गः। भवतेस्तु प्राप्त्यर्थका-
नुभवार्थे वर्त्तमानस्य सकर्मकत्वेऽपि सत्तारूपमुख्यार्थे
तथात्वाभावान्न प्रसङ्गः। एवञ्च सर्वेषामेव सकर्म-
काणां कर्तृकर्मोभयस्वभावकत्वेनाव्यवस्थायां हरिणा
क्रियाकृतविशेषेण व्यवस्था दर्शिता यथा "विशेष-